परिप्रेक्ष्य

# चिकित्साविज्ञानं यज्ञः

आचार्य बालकृष्ण[1,2], स्वामी यज्ञदेव[2*], स्वामी विप्रदेव[2]
[1]पतंजलि अनुसन्धान संस्थान, हरिद्वार, उत्तराखंड, भारत
[2]पतंजलि विश्वविद्यालय, हरिद्वार, उत्तराखंड, भारत

*संवाद लेखक: स्वामी यज्ञदेव, पतंजलि विश्वविद्यालय, हरिद्वार- 249405, उत्तराखंड, भारत
Email- swamiyagyadev@gmail.com

## सारांश

यज्ञ एका सूक्ष्मतमा पद्धतिर्वर्तते, येन पदार्थेषु निहितानां शक्तीनां प्रोद्घाटनं जायते। यथाऽयुर्वेदे वटीचूर्णारिष्टासवादय ओषधयो रोगाणां वारणार्थं प्रयुञ्जते, तस्मिन्नपि यदा शीघ्रतया परिणामो न प्राप्यते। तदा वैद्यप्रवरस्तं ओषधीरसायनं प्रदाय रुग्णं स्वस्थं करोति। यतोहि रसायनं खरलीकृत्य सूक्ष्मातिसूक्ष्मरूपेण कृतं वर्तते। तच्च यादृशं सूक्ष्मं भवति, तादृगेव शक्तिप्रदायकमपि भवति। तथैव यज्ञेऽपि अवगम्यताम्।

अत्र अग्नेः स्वभावो वर्तते, यत् स पदार्थानाम् (समिधा, घृतम्, सामग्री) ऊर्जात्वेन कणरूपेण वायव्यरूपेण च परिवर्तनं करोति। यतोऽस्माकं शरीरे च प्रकृतावपि चिकित्सकीय प्रभावो भवति। तत्र प्रारब्धजन्यदोषाणां शारीरिकमानसिकरोगाणां निवृत्तिर्भवति। अस्माकं शरीरे ऊर्जाप्रवाह: स्थूलद्रववायव्यरूपाहारमाध्यमेन भवति। यस्मिन् अधिकांशरूपेण वायव्याहारो नासिकामाध्यमेन गृह्यते। यस्य वायोः शोधनं यज्ञं कृत्वैव कर्तुं शक्यते। यतोहि तत्र एथिलीन आक्साइड इत्यादिनामको वायु:, य: प्रकृतेः कृते अतीव लाभदो मतः। ये यज्ञाग्नितो निवर्तिता वायव्यकणा भवन्ति, यतः विशेषरूपेण स्वास्थ्यलाभो जायते। तथा च यज्ञभस्मन्यपि बहूनि लाभदानि तत्त्वानि वर्तन्ते, यतः चर्मरोगः, अम्लपित्तम्, अजीर्णता दूरीक्रियते। अतो यज्ञ एकः पूर्णतया सूक्ष्मतमं चिकित्साविज्ञानं विद्यते।

## Abstract

In Vedic literature, Yagya is extensively described, with references to its many applications, including social development, spiritual development, ecological balance, and sickness prevention and cure. One of the most crucial factors is health. Yagya Therapy, also known as Yagyopathy, is the therapeutic application of Yagya. People in India conduct Yagya for a variety of reasons and use it as treatment, both deliberately and unknowingly. They do not, however, have access to its root-knowledge. As a result, it is vital to locate authentic Yagya Therapy references from Vedic and Ayurvedic books, which will not only increase its conceptual comprehension, but also serve as a foundation for public benefit and future study. The approach used in this study was a narrative literature survey. Using references from Vedic and Ayurvedic literature, the study tried to provide light on Yagya Therapy. It has been discovered that Vedic literature describes Yagya treatment for a wide range of diseases (both infectious and non-infectious) and disorders, as well as precautions, specific processes, disease causes, therapeutic supplements, and so on. As a result, this research will aid in the foundation of Yagya Therapy as a valuable therapeutic strategy, as well as pave the way for future research in this subject.

## चिकित्साविज्ञानं यज्ञः

सूक्ष्मतमं विज्ञानं यज्ञः (Nano Science Yajna) साम्प्रतिकः कालोऽयं सूक्ष्मतमविज्ञानस्य काल इत्यत्र नात्यशयोक्तिः काचिदपि। सूक्ष्मतमविज्ञानमाध्यमेन विविधान् पदार्थान् सूक्ष्मतोऽपि सूक्ष्मतमीकृत्य तन्निहितानां शक्तीनां प्रोद्घाटनं क्रियते। तेन विविधविचित्रज्ञानोपलब्धिर्जायते। विद्येयं प्राचीनकालादनवरतं प्रचलिता वर्तते। इयमेव प्राच्यविद्या यज्ञः तस्यैवात्र सूक्ष्मतमं विज्ञानं प्रस्तोष्यते। तद्यथा- आयुर्वेदपद्धतौ सामान्यतया वटीचूर्णासवारिष्टादीनां प्रयोगेण नैरोग्यप्राप्तये प्रयासः क्रियते। यदा रोगेऽसाध्ये संजाते अनेनोपायेन स्वास्थ्यलाभो न भवति, तदा वैद्यप्रवरैर्विविधरसायनादीनां प्रयोगो विधीयते। तत्र भस्मादीनां प्रयोगः प्रमुखः। अत्रेदमेव विज्ञानम् आयुर्वेदे सूक्ष्मतमविज्ञानरूपेण विधीयते, प्रयोगेऽस्मिन् रोगिभ्य आरोग्यप्रदानकार्यं सुगमं सरलञ्च जायते।

सामान्यतया प्रयुक्ता ओषधयः स्थूलद्रवादिरूपेणैव भवन्ति, न तु सूक्ष्मत्वेन। परं यदा तत्र निहितानां शक्तीनां पूर्णरूपेण जागरणं क्रियते, तदा तत्र सूक्ष्मत्वं जायते। रोगिनः कृते औषधादीनाम् आवश्यकता नैरोग्यार्थं भवति। तत्र रोगिहितार्थम् औषधीनां प्रयोगो विधीयते। अतस्तत्र गुणाधानार्थमौषधिं भस्मीकृत्य सूक्ष्मत्वमुत्पाद्यते।

सर्वप्रथमं भस्मपदार्थं खरलमाध्यमेन सूक्ष्मीक्रियते वारं वारं चिरकालं यावत् खरलक्रियायाः, तत्र सूक्ष्माधिक्यमुत्पाद्यते। यथा-यथा खरलीकरणक्रिया सुदृढ़ा तथा-तथा तत्र निहितानां गुणानां शक्तिपरिवर्धनं भवति। तत्र वैद्यप्रवरः सूक्ष्मीकृताम् औषधिमणुमात्ररूपेण प्रददाति। तत्र अल्पौषधेनैव सद्य आरोग्यप्राप्तिर्भवति। तेन मरणासन्नो रोग्यपि स्वास्थ्यं प्राप्नोति, अनेकेऽसाध्या रोगा अपि साध्या भवन्ति। सूक्ष्मीकरणक्रियया औषधावद्भुता शक्तिरुपजायते। इयमेव सूक्ष्मीकरणप्रक्रिया आयुर्वेदे सूक्ष्मतमविज्ञानरूपेण प्रसिद्धा वर्तते। होम्योपैथी इति नाम्नी पद्धति द्विशतवर्षाधिकं पुरातनी वर्तते। एषा पद्धतिः साम्प्रतिके काले समधिका लोकप्रिया दृश्यते। तस्या मूलसिद्धान्तोऽपि सूक्ष्मतमविज्ञानस्य (Nano Science) रूपमेव वर्तते। अस्यां पद्धत्यां यस्य पदार्थस्य आवश्यकता भवति, तस्य गुणकर्मस्वभावानुसारेण विशुद्धजलस्य (Distilled Water) माध्यमेन सूक्ष्मीकरणं क्रियते। यदा सा सूक्ष्मीकरणप्रक्रिया परिपूर्णतां प्राप्नोति, तत्सूक्ष्मतमं तत्त्वं वैद्युताणुरूपेण परिवर्तितं भवति। एषैव तत्तत्त्वस्य सूक्ष्मतमाणुप्रणाली वर्तते। यस्याः परिणामः शक्तिप्रदायको शीघ्रारोग्यप्रदायकश्च भवति।

यस्याः प्रणाल्या अणुरूपमेव यज्ञप्रक्रियाया अमोघशक्तिरूपिणी दिव्यविद्या वर्तते। अस्मिन् संसारे यावन्तोऽपि पदार्था उपलभ्यन्ते, तेषु सर्वेषु सूक्ष्मतमः पदार्थोऽग्निः (Fire)। संसारे तेषां पदार्थानां रूपत्रयं दृश्यते- स्थूलद्रववायुरूपेण। यथा स्थूले पदार्थे पाषाणादौ जलादिप्रवेशः कर्तुं विधातुन्न शक्यते। तत्र वायुतत्त्वस्यापि प्रवेशो न सम्भवः। तत्र कीलकीलनमपि सुगमं न भवति, यतोहि तस्मिन् स्थूले पदार्थे किमपि रिक्तस्थानं न भवति। तत्र द्रववायव्यतत्त्वानां प्रवेशोऽपि दुष्करः, रिक्तस्थानाभावात्। परं यदा स एव पाषाणादिस्थूलपदार्थोऽग्निसंसर्गं प्राप्नोति, तस्मिन् अग्निप्रवेश अबाधरूपेण दरीदृश्यते। यतोहि अग्नितत्त्वं सूक्ष्मतमं तत्त्वं वर्तते। अग्नेः स्वभावो वर्तते, यत् स यस्यापि वस्तुनः सङ्गं प्राप्नोति तमात्मसात् करोति, यथा- "अङ्गं नयतीति" अग्निरित्युच्यते। यदा अग्नौ समिधा (Wood) आहुतिः प्रदीयते, तदा स काष्ठसमिधाऽपि अग्निरूपं भवति। यदा तत्र घृतौषधिप्रभृतीनां पदार्थानां होमक्रिया विधीयते, तदा ते सर्वेऽपि पदार्थाः सूक्ष्मत्त्वं प्राप्नुवन्ति, तदा तेषां शक्तिः परिणामश्चापि अद्भुतो जायते।

यद्योऽपि पदार्थोऽग्नयेऽर्प्यते, छिन्नो भिन्नः सन् रूपान्तरितो भवति अग्नौ न तस्य विनाशो न च तस्याभावो जायते। स पदार्थस्तु ऊर्जात्वेन (Energy) कणत्वेन (Particle) वायव्यतत्त्वरूपत्वेन (Gas) च रूपान्तरितो भवति। नाश इति शब्दस्यार्थो न खलु विनाशः, अपितु पाणिनीयधातुपाठानुसारेण "णश अदर्शने" इति धातोर्नाशः शब्दः सिध्यति। यस्य अभिप्रायोऽदर्शनं रूपान्तरणं च वर्तते, न पुनर्विनाशः। एवमेव यज्ञाग्नौ घृतसमिधौषधादिरूपो योऽपि पदार्थो हूयते, स सूक्ष्मरूपं धृत्वा रूपान्तरितो भवति। तस्य सूक्ष्मतमाः कणाः तत्त्वानि च ऊर्जिताः सन्तः रूपान्तरिता जायन्ते। न खलु विनश्यति न चापि तेषामभावत्वप्रतीतिः यथा जलपूरितं पात्रम् अग्नौ स्थाप्यते, तत् वाष्पत्वेन परिवर्त्य सूक्ष्मरूपं धृत्वा च अन्तरिक्षे विलीयते, न पुनः साक्षाद् दृश्यते वाष्परूपेण परिवर्तनस्य तस्य जलस्य न खलु अभावः, अपितु रूपान्तरणमेव भवति।

अतः पदार्थस्य नाश इति रूपान्तरितो युक्तिसंगतः। अयमेव नाशशब्दस्य शाब्दिको वास्तविकश्चार्थः। महर्षिकपिलमुनिना सांख्यदर्शनेऽपि प्रतिपादितं सूत्रं (1.86)- नाशः कारणलयः। अस्याऽयमभिप्रायो यत् नाश इत्यस्य वास्तविकोऽर्थः कारणलयोऽस्ति। स एव ऊर्जारूपान्तरणं भवति। ऊर्जायां रूपान्तरणं कस्यापि पदार्थस्य प्रभावशालिरूपं वर्तते। तत्परिणामः सूक्ष्मतम ऊर्जाशाली च भवति। ऊर्जस्विनः पदार्थस्य चिकित्सकीयप्रभावः स्थूलशरीरे मनसि अपि प्रत्यक्षरूपेण भवति। अनेन स्पष्टं भवति यत् सूक्ष्मपदार्थानां चिकित्सकीयप्रभावोऽस्माकं शरीरे अन्नप्राणमनोविज्ञानानन्दमयनामकेषु पंचकोशेषु स्पष्टरूपेण परिलक्ष्यते। एतस्मादेव कारणात् पञ्चप्राणानां पञ्चानामुपप्राणानां पोषणम् अष्टचक्रेषु प्रभाविरूपेण सत्त्वसंचारितं भवति। तेन मानवीयचेतनाया उत्कर्षं। अतिमानसचेतनया संयुक्तो भवति। इत्येवं यज्ञचिकित्सया सर्वमिदं उत्कर्षं भूत्वा भवति।

वायु चिकित्सा (Air Therapy) सम्यक् प्रकारेण जीवनं जीवितुं प्राणीनां कृते ऊर्जाया महती आवश्यकता विद्यते। सा उर्जा आहारेण प्राप्यते, असावाहारः स्थूलद्रव्यवायव्यतत्त्वरूपेण ऊर्जादायको भवति। वयं प्रतिदिनं द्विधा त्रिधा वा भोजनं भुञ्जामहे। यस्मिन् स्थूलरूपेण रोटिकौदनादिकं भवति द्रवरूपेण च सूपादिकं भवति। वायव्यतत्त्वरूपेण च तत्र अत्यधिकोपयोगो जायते, यतोहि तस्य निषेवणं भोजने पाने चलने शयने च प्रतिपलं जायते।

अनेनेदं सिध्यति यत् वायव्यतत्त्वस्य आहाररूपेण प्रयोगः सर्वाधिको भवति, अतोऽस्य महत्त्वमपि सर्वाधिकम्। यदि वयं भोजने स्थूलमाहारं न गृह्णीमः, तदापि वयं मासद्वयं मासत्रयं वा जीवितुं शक्नुमः। यदि वयं द्रवरूपमाहारं न कुर्मः, तदा सप्ताहद्वयं सप्ताहत्रयं वा जीवितुं शक्नुमः। परं यदि वायव्यतत्त्वरूपमाहारं न गृह्णीमः, तदा कलाद्वयं कलात्रयं वा जीविनमपि न सम्भवम्। अतः सिध्यति इदं यत् सर्वविधेषु आहारेषु वायव्यतत्त्वाहारो वरीयान् गरीयान् महीयान् च।

आयुर्वेदग्रंथेषु लिखितमस्ति यद् ऋतुणामाधारेण शरीरेषु वातपित्तकफादिदोषा वर्धन्ते क्षीयन्ते च। येषां सम्बन्धः साक्षात् वायुना वर्तते। ग्रीष्मर्तौ वायुमण्डलमुष्णायते, येन पित्तदोषा वर्धन्ते। एवमेव वर्षर्तौ वातदोषाः शीतर्तौ कफदोषाश्च वर्धन्ते।

आयुर्वेदानुसारं स्थूलरूक्षभोजनेन वातदोषाः ऊष्णभोजनेन पित्तदोषाः स्निग्धशीतभोजनेन च कफदोषा वर्धन्ते। एवमेव वायव्यतत्त्वरूपाहारः शरीरे वातपित्तकफदोषान् वर्धयति संकोचयति च।

"निषीद होत्रमृतुथा यजस्व" (10.98.4) इति ऋग्वेदवचनोऽनुसारं विविधेषु ऋतुषु विविधौषधादिहोमपदार्थैर्यज्ञसम्पादनेन वायुमण्डले वातपित्तकफदोषाः सन्तुलिता भवन्ति प्राणिनश्च दोषमुक्ता भवन्ति। यदा शरीरे वातपित्तादयो दोषाः सन्तुलिता जायन्ते, तदा स्वास्थ्यलाभः सुगमो भवति।

आयनीक चिकित्सा (Ion Therapy) वयं यस्मिन् वायुसागरे श्वासं धारयामः तस्मिन् द्विधा धूलिकणाः प्रत्यक्षीभवन्ति। तत्र एके ऋणायनाः (Anion) कणा अन्ये च धनायनाः (Cation) कणाः। ऋणायनैर्युक्तः प्राणी स्वास्थ्यलाभाय कल्प्यते। एते कणा निर्झरेषु नदीतटेषु समुद्रतीरेषु वनपर्वतेषु ग्रामीणक्षेत्रेषु च पर्याप्ता भवन्ति। अत एव जलवायुपरिवर्तनार्थं जना एतेभ्यः स्थानेभ्यः स्पृहयन्ति। वायुमण्डले स्वास्थ्यलाभः शीघ्रं प्रजायते। सामान्यभाषायां पद्धतीयम् आयनीकपद्धतिः (Ion Therapy) कथ्यते।

यत्र नियमितरूपेण यज्ञकर्म भवति, तत्र ऋणायनस्य मात्रा द्विशततः चतुश्शतं (200 - 400) यावद् भवति। अनेन सिध्यति यद्येऽपि जनाः निजगृहस्य वायुमण्डलं वातावरणं वा निर्झरनदीवनपर्वतक्षेत्रसदृशं कर्तुमिच्छन्ति सदा स्वास्थ्यञ्च वाञ्छन्ति, तैः प्रतिदिनं यज्ञकर्म विधातव्यम्। एवमेव यस्मिन् धनावेशितकणानां बाहुल्यं भवति, तत्र स्वास्थ्यहानेः संभावना प्रबला जायन्ते। जनसम्मर्देषु प्रदूषितक्षेत्रेषु, नगरप्रभावेषु, औद्योगिकस्थलेषु च एतेषां प्रदूषितकणानां बाहुल्यं भवत्येव। तत्र चिरकालं यावत् निवासेन मानवस्वास्थ्यं क्षीयते रोगनिवारणसुविधा न सौख्यप्रदा सिध्यति।

पूर्वोक्तं तथ्यमेव "अल्वर्ट कुर्जर" नामकेन वैज्ञानिकेन विविधशोधपरीक्षणे साधितम्, यद्धनायनयुक्ते वातावरणे 'ब्लड सिरोटोनिन' इत्यस्य मात्रा वर्धते। येन स्वास्थ्यहानिर्जायते स्वास्थ्यलाभे च काठिन्यं प्रतीयते।

परम् ऋणायनेन युक्ते वायुमण्डले 'ब्लड सिरोटोनिन' इत्यस्य मात्रा न्यूना भवति। अनेन विशिष्टस्वास्थ्यलाभो जायते।

रोगजनकसूक्ष्मजीवनाशकः (Mircobial Killer) इदं हविर्यातुधानान् नदीफेनमिवावहत् (1.8.2) इति अथर्ववेदवचनानुसारेण यदा औषधिद्रव्यैर्गोघृताहुतिसहितं यज्ञकर्म क्रियते, तदा एथिलीन-आक्साईड, प्रॉपलीन-आक्साईड इतिप्रभृतीनां वायव्यतत्त्वानां निर्माणं भवति। एतेषां प्रभावेण घातकजीवाणुविषाणुकवकतत्त्वानां विनाशो जायते, अनेन विविधरोगनिवृत्तिश्च भवति। यज्ञनिर्मितविविधवायव्यतत्त्वानां योगेन सूक्ष्मा विषाणवो नश्यन्ति, तेन रोगनिवृत्तिरपि जायते। वर्तमानयुगे सकलेऽपि संसारे दूषितसूक्ष्मजीवानां कारणेन कोटिद्वयपरिमिता जना मृत्युं गताः, अत्र यज्ञकर्मैव सर्वश्रेष्ठोपायः।
अस्या यज्ञचिकित्साया विविधेषु पक्षेषु अयं महत्त्वपूर्णपक्षो वर्तते। य आधुनिकविज्ञानेनाऽपि साधितः, यद्यज्ञेन संक्रामकरोगाणां (Communicable Disease) विनाशः सम्भवः।

यज्ञाग्नितापवर्णरश्मिभिश्चिकित्सा– यज्ञोऽस्माकं गृहस्य सूर्यो वर्तते, यथा सूर्यचिकित्सायाः प्रचलनं दृश्यते, तस्मिन् सूर्यतापसेवनेन रोगनिवृत्तिर्भवति। तथैव यज्ञकर्म अपि श्रेष्ठकर्म। यज्ञाग्निदर्शनेन तस्य तापस्य रश्मिनाञ्च प्रभावोऽस्माकं शरीरे प्रत्यक्षी भवति। तेन विविधा रोगा नश्यन्ति जनाश्च स्वस्था भवन्ति।

कर्माशयजन्यरोगनाशको यज्ञः– सहस्रंभरः शुचिजिह्वोऽग्निः (2.9.1) इति ऋग्वेदवचनोऽनुसारेण

यज्ञेन पुण्यप्राप्तिर्भवति, यज्ञज्वालाभिर्विविधा लाभा भवन्ति, यज्ञः कृषिरूपोऽपि भवति। तेषां पुण्यकर्मणां आधारेणैव जात्यायुर्भोगप्राप्तिर्भवति।

वयं वर्तमानकाले यज्ञजीवनं जीवामः, तत्पूर्वकृतपुण्यकर्मणां प्रतिफलम्। यदि स पुण्यकर्माशयो दुर्बलो भवति, तर्हि तत्परिणामः कुष्ठादिरूपेणायुर्वेदे प्रतिपादितः। श्रापाभिचारादिजनितासाध्यदुष्टरोगाणां निवारणार्थं यज्ञचिकित्सैव सर्वसुगमोपायः। मीमांसादर्शनेऽपि प्रतिपादितं यत् सन्तानोत्पत्त्यर्थं कर्माशयोऽपेक्षते। यः सन्तानसुखवर्जितः स्यात्, तस्य कृते यज्ञयागादिरूप उपाय एव सर्वोत्तमः। अतोऽसाध्यरोगेभ्यो निवृत्त्यर्थं विशिष्टसुखलाभाय यज्ञचिकित्सा अवचारणीया।

भस्म चिकित्सा (Ash Therapy) यज्ञशेषरूपेण प्राप्तं यज्ञाग्निभस्म बहुमूल्यौषधिरूपं भवति। प्राचीनकाले ऋषयो मुनयो यज्ञभस्मना तिलिकिता भवन्ति स्म, सम्पूर्णेऽपि शरीरे भस्मलेपनं कुर्वन्ति स्म, यज्ञशेषरूपेण च तत्राभ्यागता जना भस्मप्राप्य कृतकृत्या भवन्ति स्म। ते विविधानां रोगाणामुपक्षमाः स्वास्थ्यलाभाय च भवन्ति स्म। यदा शिशवः सूर्यातपे क्रीडनाय गच्छन्ति स्म, तदा जननीभिर्भस्मलेपेन सुसज्जिताः कृता बाला रोगमुक्ता भवन्ति स्म।

कामं पूर्वोक्तं विवेचनम् केषाचित् मते अन्धश्रद्धाया विषयो भवेत्, परं आधुनिकविज्ञानमाध्यमेन वैज्ञानिकैः साधितं यद् भस्मनि रोगप्रतिरोधका विविधगुणा विराजन्ते। प्राकृतिकचिकित्सायां तत्प्रयोगः प्रचलितो वर्तते। विशुद्धभस्मप्रयोगेण शरीरमालिन्यं विनश्यति रोगमुक्तिश्च जायते, अतश्चापीपात्राणां परिमार्जनं भस्मना एव क्रियते स्म।

यज्ञभस्मप्रयोगेण विविधेभ्यः चर्मरोगेभ्यो मुक्तिर्भवति, यज्ञभस्मनि विविधाः सौन्दर्यवर्धकगुणा विराजन्ते। अतो देशे विदेशे च मुखादिप्रसादकपदार्थेषु भस्म प्रयोगो विधीयते। भस्मप्रयोगेण मुखे संजातानां पीटिकपीटिकादिरोगाणां शमनं शरीरकलंकनिवृत्तिश्चर्मरोगोपशमनं च भवति। इदं भस्म वरदानस्वरूपमौषधं वर्तते। भस्मनि जलं विधाय कञ्चित् कालं यावत् स्थापिते सति, तत्र विद्यमाना विषाणवो रोगाणवश्च नश्यन्ति। भस्ममिश्रिते जले अम्लक्षारीयादीनाम् अपेक्षिततत्त्वानां सन्तुलनं निर्धारितं भवति। तेन जलम् ऊर्जस्व्यौषधीयतत्त्वसंयुक्तञ्च (Energetic and Medicated) भवति। 'पतञ्जलि शोधसंस्थानम्' इति माध्यमेन साधितं प्रतिपादितं च आम्लिकजना भस्मजलप्रयोगेण कतिपयेषु एव दिवसेषु निरोगा जायन्ते। भस्मजलमिश्रितपोटलिकाप्रयोगेण रक्तश्वाससंचारप्रणाली विशुद्धा सुदृढा भवति। असहनशीलता (एलर्जी), तात्त्विकासन्तुलनं (मिनरल डेफिशिएन्शी) प्रभृतीनां रोगाणां निवृत्तिर्भवति। तथ्यञ्चेदं आधुनिकविज्ञानेनापि साधितं प्रमाणितञ्च यत् आयुर्वेदहोम्योपैथिक पद्धतिप्रभृतीभिः साधितं भस्म विविधरोगनिवारकम् एलोपैथीजन्यानां दुष्प्रभावाणां निवृत्तिकारकमपि वर्तते। अस्य प्रयोगेण परमाण्विकविकिरणादि (Atomic Radiation) प्रभावितमन्नमपि द्रुतमेव शोधयितुं सुरक्षयितुञ्च शक्यते। अनेके हानिकारकाः प्रभावा अपि प्रायः क्षीणा भवन्ति।